International Journal of Sanskrit Research 2016; 2(6): 66-67

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2016; 2(6): 66-67
© 2016 IJSR
www.anantaajournal.com
Received: 15-09-2016
Accepted: 16-10-2016

**Samar Saha**
Research Schoolar, M.Phil
Jadavpur University
Jadavpur, Kolkata -700032
Sanskrit-Department
West Bengal, India

**Correspondence**
**Samar Saha**
Research Schoolar, M.Phil
Jadavpur University
Jadavpur, Kolkata -700032
Sanskrit-Department
West Bengal, India

# शाकुन्तले मूल्यशिक्षा

**Samar Saha**

कविकूलेशस्य कालिदासस्य प्रसिद्धकाव्येषु 'अभिज्ञानशाकुन्तलम्' अन्यतमं विद्यते। शिक्षायाः लक्ष्येषु नैतिकमूल्यानां विकासः प्रधानविषयः भवति। महर्षिकण्वस्य औदार्यः, पोषणक्षमता, शकुन्तलायै कण्वोपदेशः इत्यादयः विचाराः नैतिकतायाः प्रतिविम्बात्मकविषयाः सन्ति।

नाटकस्य प्रस्तावनांशे यदा सूत्रधारः नाटकस्य उपस्थापनकौशलविषये स्वस्य प्रयोगविज्ञानविषये संशययुक्तः भूत्वा समधिकः यत्नशीलः भवितुम् इच्छति, तदा नटी तस्य अभिनयविज्ञानं प्रशंस्य तम् आश्वस्तं करोति। तस्याः वचनेन स्वप्रतिक्रियां ज्ञापयित्वा सूत्रधारः कथयति –

''आपरितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम्।
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः।।''

अर्थात् ये तावत् रसिकाः नाट्यकलानिष्णाताः पण्डिताःविद्यन्ते ते खलु नाटकस्य अभिनयान्ते साधु असाधु वा इति मतं प्रकाशयन्ति। यावत् तेषां चित्तप्रसादनं न भवति तावत् अभिनयकौशलं सम्यक् प्रदर्शितम् इति न मन्तव्यम्। सूत्रधारस्य मते केनापि स्वकार्यस्य साधुत्व-असाधुत्वनिरूपणं न कर्तव्यम्, अन्यैः तत् कर्तव्यम्। तेन कार्यस्य यथार्थमूल्यनिर्धारणं संभवति।

नाटकस्य प्रथमेऽङ्के आश्रमे प्रवेशकोल राजा दुष्यन्तः सूतं निकषा आत्मनः आभरणानि धनुः च अर्पयित्वा आश्रमे प्रविशति। यतः विनीतवेशेन आश्रमे प्रवेष्टुम् इच्छति राजा दुष्यन्तः। दुष्यन्त आह -- ''विनीतवेशेन प्रवेष्टव्यानि तपोवनानि नाम''। अत्र राज्ञः दुष्यन्तस्य विनयता प्रतिपाद्यते।

पुनः ''प्रच्छायशीतलसप्तपर्णवेदिकायाम् उपविश्य परिश्रमप्रशमं करोतु आर्य' इति प्रियंवदायाः अनुरोधं श्रुत्वा राजा दुष्यन्तः सर्वान् उपवेष्टुं कथयति। तदा अनसूया शकुन्तलां प्रति उक्तवती --- 'उचितं नः पर्युपासनम् अतिथीनाम्' – अर्थात् अतिथेः अनुरोधः रक्षणीय इति भावः।

नाटकस्य द्वितीयेऽङ्के राजा दुष्यन्तः यदा तपोवने पुनर्गमनाय विदूषकेन सह आलापयति तदा विदूषकः 'नीवारषष्ठभागम् उपहरणाय वयं गन्तुं शक्नुमः' इति आह। तदा राजा दुष्यन्तः विदूषकं 'मूर्ख' इति आहूय कथयति --- 'अन्यद्भागधेयमेतेषां रक्षणे निपतति, यद्रत्नराशीनपि विहायाभिनन्द्यम्' अपि च कथयति --

'यदुत्तिष्ठति वर्णेभ्यो नृपाणां क्षयि तत् फलम्।
तपः षड्भागमक्षय्यं ददत्यारण्यका हि नः।।''
एतेन राज्ञः विनयता नैतिकता च प्रकाश्यते।

नाटकस्य तृतीयेऽङ्के मदनसन्तप्तापि शकुन्तला गुरूजनस्य अनुमतिं विना सा प्रणये अनाग्रही। तस्मात् सा कथयति -- ''मदनसन्तप्ता अपि नहि आत्मनः प्रभवामि''।

नाटकस्य चतुर्थेऽङ्के प्रभातवर्णनावसरे दृष्टान्तमाध्यमेन नराणां भाग्यपरिवर्तनस्य नियतत्वं प्रतिपादितम् –

''यात्येकतोऽस्तशिखरं पतिरोषधीना -
माविष्कृतोऽरुणपुर:सर एकतोऽर्क:।
तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां
लोको नियम्यत इवात्मदशान्तरेषु।।''

प्रभाते पश्चिमाकाशे यदा चन्द्र: अस्तं याति तदा एव पूर्वस्यां दिशि सूर्य: उदेति। द्वयो: चन्द्रसूर्ययो: युगपद् अस्तोदयाभ्याम् एतद् ज्ञायते यत् इह जगति सर्वेषां जनानां क्षयोदयौ विद्येते। न कोऽपि अत्र बहुकालस्थायी इति। अयं लोक: सदा सम्पद्विपद्भ्यां नियम्यते। कस्यापि जनस्य यथैव सम्पत्ति: भवति तथैव विपत्ति: अपि भवति। सम्पत्ति: न नित्या विपत्ति: अपि न नित्या। अत: सम्पत्तिविपत्तिकाले केनापि हर्षशोकौ न कर्तव्यौ। दु:खेषु अनुद्विग्नता सुखेषु स्पृहाशून्यता नितरां काम्या।
अस्मिन् नाटके चतुर्थेऽङ्के यदा शकुन्तला पतिगृहं गच्छति, तदा पालितपिता महर्षि: कण्व: पतिगृहं गत्वा किं करणीयमित्यस्मिन् विषये श्लोकेनैकेन कथयति -

''शुश्रूषस्व गुरून् कुरू प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मास्म प्रतीपं गम:।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामा: कूलस्याधय:।।''

इत्थं रमण्य: 'गृहलक्ष्मीपदं' प्राप्नुवन्ति, विपरिताचरणवत्य: स्त्रिय: वंशस्य दु:खप्रदायिन्य: भवन्ति।
नाटकस्य पञ्चमेऽङ्के यदा कण्वशिष्या: राजान्त:पुरं प्रति आगतवन्त: तदा तं संवादं राज्ञे निवेदयितुं कञ्चुके: मनसि द्विधा अजायत। यत: राजा अधुना राजकार्यं समाप्य परिश्रान्त:। परन्तु सहसा कञ्चुके: मनसि कर्तव्यबोध: अजायत, कुत: ''अविश्रामोऽयं लोकतन्त्राधिकार:'' इति। यत: -

''भानु: सकृद्युक्ततुरङ्ग एव
रात्रिन्दिवं गन्धवह: प्रयाति।
शेष: सदैवाहितभूमिभार:
षष्ठांशवृत्तेरपि धर्म एष:।।''

दुर्वाससा अभिशापेन शकुन्तलावृत्तान्तविस्मृत: दुष्यन्त: परदारग्रहणभयात् शकुन्तलां परित्यक्तवान्। एतेन राज्ञ: धर्मानुराग: प्रकाश्यते। राजा दुष्यन्त: कथयति -

''कुमुदान्येव शशाङ्क: सविता बोधयति पङ्कजान्येव।
वशिनां हि परपरिग्रहसंश्लेषपराङ्मुखी वृत्ति:।।''
राज्ञा दुष्यन्तेन परित्यक्तां शकुन्तलां प्रति शार्ङ्गरव: कथयति -
''अत: परीक्षा कर्तव्यं विशेषात् संगतं रह:।
अज्ञातहृदयेष्वेवं वैरीभवति सौहृदम्।।''

अर्थात् अज्ञातहृदयेषु प्रेमनिवेदनात् प्राक् सदा परीक्षा करणीया, अन्यथा तत् सौहृद्यं वैरी भवति।
नाटकस्य षष्ठेऽङ्के राजाङ्गुलीयकचौर इति मत्वा धृतस्य धीवरस्य जीविकाम् अवलम्ब्य यदा राजरक्षिण: परिहासं कुर्वन्ति तदा धीवर: कथयति -

''सहजं किल यत् विनिन्दितं न खलु तत्कर्मविवर्जनीयम्।
पशुमारणकर्मदारूण: अनुकम्पामृदुरपि श्रोत्रिय:।।''

अत: कस्यापि वृत्तिविषये निन्दा न कर्तव्या इति भाव:। पुन: धीवरात् अङ्गुलीयकं प्राप्य राज्ञ: मनसि यदा शकुन्तलावृत्तान्त: पुनरूदेति तदा राजा शोकाधीन: अभवत्। तदा विदूषक: माधव्य: राजानं कथयति -- ''कदापि सत्पुरूषा: शोक्वास्तव्या: न भवन्ति। ननु प्रवाते अपि निष्कम्पा गिरय:''। नाटकस्य अन्तिमे राज्ञ: दुष्यन्तस्य मारीचाय वरप्रार्थना तस्य आदर्शनृपतित्वं कर्तव्यतां च सूचयति -

''प्रवर्ततां प्रकृतिहिताय पार्थिव:
सरस्वती श्रुतमहतां महीयताम्।
ममापि च क्षपयतु नीललोहित:
पुनर्भवं परिगतशक्तिरात्मभू:।।''

इत्थमभिज्ञानशाकुन्तलम् इति नाटके महाकवि: कालिदास: विविधै: चरित्रै: बहुषु श्लोकेषु नैतिकशिक्षां प्रतिपादयति। एतेषां नैतिकविषयानां शिक्षणं स्तरानुगुणं प्राथमिकस्तराद् उच्चस्तरपर्यन्तं सर्वविधशिक्षाव्यवस्थासु स्यादिति मम आशा।

**सहायकग्रन्थ**

1. कालिदास: अभिज्ञानशाकुन्तलम्. सत्यनारायण चक्रवर्त्तीसम्पादितम् अभिज्ञानशकुन्तलम्. कोलकाता: संस्कृतपुस्तकभाण्डार: २००७ (१९८८ प्रथमप्रकाश:).